## कारके । (२३/५३४)

कारके इति विशेषणमपादानादि[1]सञ्ज्ञाविषयमधिक्रियते । कारके इत्यधिकारो वेदितव्यः । यदित ऊर्ध्वमनुक्रमिष्यामः कारके इत्येवं [2]तद् वेदितव्यम् । कारकशब्दश्च निमित्तपर्यायः । कारकम् [3]हेतुः इत्यनर्थान्तरम् । कस्य हेतुः? क्रियायाः[4] । वक्ष्यति, 'ध्रुवमपायेऽपादानम्' (१.४.२४/५८६)–ग्रामादागच्छति । पर्वतादवरोहति । कारके इति किम्? वृक्षस्य पर्णं पतति । [5]कुडचस्य पिण्डः पतति । '[6]अकथितं च' (१.४.५१/५३९), [7]अकथितं च कारकं कर्मसञ्ज्ञं भवति–माणवकं पन्थानं पृच्छति । [8]कारके इति किम्? माणवकस्य पितरं पन्थानं पृच्छति । [9]कारकसंशब्दनेषु चानेन [10]एव विशेषणेन[11] व्यवहारो [12]विज्ञायते ॥

## ध्रुवमपायेऽपादानम् । (२४/५८६)

ध्रुवं यदपाययुक्तमपाये साध्ये यदवधिभूतं तत् कारकमपादानसञ्ज्ञं भवति । [13]ग्रामादागच्छति । पर्वतादवरोहति । सार्थाद्धीनः । रथात् [14]पतितः ।

[५८] जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानम् । (म.भा. १.३२६)

अधर्माज् जुगुप्सते । [15]अधर्माद् विरमति । धर्मात् प्रमाद्यति । अपादानप्रदेशाः–'अपादाने पञ्चमी' (२.३.२८/५८७) इत्येवमादयः ॥

## भीत्रार्थानां भयहेतुः । (२५/५८८)

बिभेत्यर्थानां त्रायत्यर्थानां च धातूनां प्रयोगे भयहेतु[16]र्यः स्तत् कारकमपादानसञ्ज्ञं भवति । चौरेभ्यो बिभेति । चौरेभ्य [17]उद्विजते । त्रायत्यर्थानाम्–चौरेभ्यस्त्रायते । चौरेभ्यो रक्षति । भयहेतुः इति किम्? अरण्ये बिभेति । अरण्ये त्रायते ॥

## पराजेरसोढः । (२६/५८९)

[18]परापूर्वस्य जयतेः प्रयोगेऽसोढो, योऽर्थः सोढुं न शक्यते, तत् कारकमपादानसञ्ज्ञं भवति । अध्ययनात् पराजयते[19] । असोढः इति किम्? शत्रून् पराजयते ॥

## वारणार्थानामीप्सितः । (२७/५९०)

वारणार्थानां धातूनां प्रयोगे य ईप्सितोऽ[20]र्थः तत् कारकमपादानसञ्ज्ञं भवति । [21]प्रवृत्तिविघातो वारणम् । यवेभ्यो गा वारयति । [22]यवेभ्यो गा [23]निवर्तयति । ईप्सितः इति किम्? यवेभ्यो गा [24]वारयति क्षेत्रे ॥

---

1. °सञ्ज्ञायामधिक्रियते क. 2. तद् नास्ति अ. 3. निमित्तं क. ह, निमित्तं करणं फ. 4. इति इत्यधिकम् अ. 5. कुडचे ई. 6. सूत्रमिदं नास्ति ह. 7. वाक्यमिदं नास्ति अ. 8. कारके ....पृच्छति नास्ति ह. 9. कारकशब्दनेषु फ. 10. एव नास्ति अ. 11. एव इत्यधिकम् क. 12. वेदितव्यः अ. 13. उदाहरणमिदं नास्ति फ. 14. पतति फ. 15. धर्माद् ड. 16. यत् क.फ. 17. त्रस्यते अ. 18. पराजयतेः ह. 19. भोजनात्पराजयते इत्यधिकम् फ. 20. अर्थः नास्ति फ. 21. प्रवृत्ति नास्ति क. 22. तिलेभ्यो ड. 23. निषेधयति अ. 24. निवारयति फ, रक्षति अ.